# karpUra AratI mantraH

# કર્પૂર આરતી મન્ત્રઃ

## Document Information

Text title : karpuuraarati as performed in Ramanujacharya Sampradaya

File name : karpuuraarati.itx

Category : AratI, vishhnu, vishnu_misc, vishnu, mangala

Location : doc_vishhnu

Transliterated by : N

Proofread by : N

Latest update : October 11, 2001

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2021

*sanskritdocuments.org*

karpUra AratI mantraH

# કર્પૂર આરતી મન્ત્રઃ

શ્રિયઃ કાન્તાય કલ્યાણ નિધયે નિધયેઽર્થિનાં
શ્રીવેઙ્કટનિવાસાય શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૧

લક્ષ્મીચરણલાક્ષાઙ્કસાક્ષિશ્રીવત્સવક્ષસે ।
ક્ષેમઙ્કરાય સર્વેષાં શ્રીરઙ્ગેશાય મઙ્ગલમ્ ॥ ૨॥

સમસ્તજીવમોક્ષાય શ્રીરઙ્ગપુરવાસિને ।
કન્દ્રાદમુનિપૂજ્યાય શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૩॥

અસ્તુ શ્રીસ્તનકસ્તૂરીવાસનાવાસિતોરસે ।
શ્રીહસ્તિગિરિનાથાય દેવરાજાય મઙ્ગલમ્ ॥ ૪॥

કમલાકુચ કસ્તૂરી કર્દમાઙ્ગિત વક્ષસે ।
યાદવાદ્રિનિવાસાય સમ્પત્પુત્રાય મઙ્ગલમ્ ॥ ૫॥

મઙ્ગલં કોસલેન્દ્રાય મહનીયગુણાબ્ધયે ।
ચક્રવર્તિતનૂજાય સાર્વભૌમાય મઙ્ગલમ્ ॥ ૬॥

શ્રીમદ્ગોપાલબાલાય ગોદાભીષ્ટપ્રદાયિને ।
શ્રીસત્યાસહિતાથાસ્તુ કૃષ્ણદેવાય મઙ્ગલમ્ ॥ ૭॥

નીલાચલનિવાસાય નિત્યાય પરમાત્મને ।
સુભદ્રાપ્રાણનાથાય જગન્નાથાય મઙ્ગલમ્ ॥ ૮॥

આજન્મનઃ ષોડશાબ્દં સ્તન્યાદ્યનભિલાષિણે ।
શ્રીશાનુભવપુષ્ટાય શઠકોપાય મઙ્ગલમ્ ॥ ૯॥

શ્રીમત્યૈ વિષ્ણુચિત્તાર્યમનોનન્દનહેતવે ।
નન્દનન્દનસુન્દર્યૈ ગોદાયૈ નિત્ય મઙ્ગલમ્ ॥ ૧૦॥

શ્રીમન્મહાભૂતપુરે શ્રીમત્કેશવયજ્વનઃ ।
કાન્તિમત્યાં પ્રસૂતાય યતિરાજાય મઙ્ગલમ્ ॥ ૧૧॥

મઙ્ગલાશાસન પરૈર્મદાચાર્ય પુરોગમૈઃ
સર્વૈશ્ચ પૂર્વૈરાચાર્યૈઃ સત્કૃતાયાસ્તુ મઙ્ગલમ્ ॥ ૧૨॥

શ્રીમતે રમ્યજામાત્રે મુનીન્દ્રાય મહાત્મને
શ્રીરઙ્ગવાસિને ભૂયાત્ નિત્યશ્રીર્નિત્યમઙ્ગલમ્ ॥ ૧૩॥

ઇતિ કર્પૂર આરતી મન્ત્રઃ ।
ઇતિ મુક્તકમઙ્ગલં સમાપ્તમ્ ।

---

*karpUra AratI mantraH*
pdf was typeset on December 25, 2021

Please send corrections to *sanskrit@cheerful.com*